# Shri Ramopasana

# શ્રીરામોપાસના

## Document Information

Text title : Shri Ramopasana

File name : rAmopAsanA.itx

Category : raama

Location : doc_raama

Proofread by : Mrityunjay Pandey

Latest update : February 15, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2024

*sanskritdocuments.org*

# શ્રીરામોપાસના

॥ શ્રીહનુમતે નમઃ ॥

॥ શ્રીમતે રામાનન્દાચાર્યાય નમઃ ॥

જગદ્ગુરુ શ્રીરામાનન્દાચાર્યપ્રતિષ્ઠાપિત શ્રીરામોપાસના

સીતાનાથસમારમ્ભાં રામાનન્દાર્યમધ્યમામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥

યત્ર યત્ર રઘુનાથકીર્તનં તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
વાષ્પવારિપરિપૂર્ણલોચનં મારુતિન્નમતરાક્ષસાન્તકમ્ ॥

વાઞ્છાકલ્પતરુભ્યશ્ચ કૃપાસિન્ધુભ્ય એવ ચ ।
પતિતાનાં પાવનેભ્યો વૈષ્ણવેભ્યો નમોનમઃ ॥

તદિત્થં પઞ્ચસંસ્કારસમ્પન્નો મુમુક્ષુરુપાસકો મુહૂર્તમાત્રાવશિષ્ટાયાં રાત્રૌ નિરલસઃ પ્રાતઃ સમુત્થાય સવિધિનિત્યક્રિયાં સમ્પૂર્ય ધૌતપાણિપાદઃ પ્રાઙ્મુખોપવિશ્ય સન્ધ્યાવન્દનાદિકર્માણિ કૃત્વા આચાર્યપરમ્પરાં સ્મરેત્-
શ્રીરામં જનકાત્મજામનિલજં વેધો વશિષ્ઠાવૃષી,
યોગીશં ચ પરાશરં શ્રુતિવિદં વ્યાસં જિતાક્ષં શુકમ્ ।
શ્રીમન્તં પુરુષોત્તમં ગુણનિધિં ગઙ્ગાધરાદ્યાન્યતીન્,
શ્રીમદ્રાઘવદેશિકઞ્ચ વરદં સ્વાચાર્યવર્યં શ્રયે ॥

અથ ભગવન્તં સ્તુત્વા પઞ્ચોપનિષન્ન્યાસં કુર્યાત્ - ।

## સ્તુતિઃ

હરિઃ ૐ સચ॑ન્ત॒ યદુ॒ષસઃ॒ સૂર્યે॑ણ ચિ॒ત્રામ॑સ્ય કે॒તવો॒ રામ॑વિન્દન્ ।
આ યન્નક્ષ॑ત્રં॒ દદૃ॑શે દિ॒વો ન પુ॒નર્ય॒તો નકિ॑રદ્ધા નુ વેદ ॥

ઋગ્વેદ ૧૦.૧૧૧.૦૭
હરિઃ ૐ અર્વા॑ચી સુભગે ભવ॒ સીતે॒ વન્દા॑મહે ત્વા ।

યથા॑ નઃ સુ॒ભગા॒સસિ॒ યથા॑ નઃ સુ॒ફલા॒સસિ ॥

ઋગ્વેદ ૪.૦૫૭.૦૬

## ન્યાસઃ

ૐ ષાં નમઃ પરાય પરમેષ્ઠ્યાત્મને નમઃ ઇતિ શિરસિ ॥ ૧॥

ૐ યાં નમઃ પરાય પુરુષાત્મને નમઃ ઇતિ નાસાગ્રે ॥ ૨॥

ૐ રાં નમઃ પરાય વિશ્વાત્મને નમઃ ઇતિ હૃદયે ॥ ૩॥

ૐ વાં નમઃ પરાય નિવૃત્ત્યાત્મને નમઃ ઇતિ ગુહ્યે ॥ ૪॥

ૐ લાં નમઃ પરાય સર્વાત્મને નમઃ ઇતિ પાદયોઃ ॥ ૫॥

એવં પઞ્ચોપનિષન્ન્યાસં વિધાય શ્રીમન્ત્રરાજન્યાસં કુર્યાત્ ।
ૐ રાં જ્ઞાનાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ નમઃ ઐશ્વર્યાય તર્જનીભ્યાં નમઃ ।
ૐ રામાય શક્ત્યૈ નમઃ મધ્યમાભ્યાં નમઃ ।
ૐ બલાય અનામિકાભ્યાં નમઃ ।
ૐ તેજસે કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ રાં જ્ઞાનાય હૃદયાય નમઃ ।
ૐ નમઃ ઐશ્વર્યાય શિરસે સ્વાહા ।
ૐ રામાય શક્ત્યૈ શિખાયૈ વષટ્ ।
ૐ બલાય કવચાય હુમ્ ।
ૐ તેજસે નેત્રાભ્યાંવૌષટ્ ।
ૐ રામાય વીર્યાય અસ્ત્રાય ફટ્ ।
અથ દિવ્યમઙ્ગલવિગ્રહસ્ય સાઙ્ગસાયુધસપરિકરસ્ય ભગવતો રામભદ્રસ્ય મનસૈવ એકૈકમઙ્ગં બ્રહ્મસૃષ્ટિલોકોત્તરસૌન્દર્યલાવણ્યાઢ્યં ધ્યાયન્ (પ્રાતઃસ્મરામિરઘુનાથમુખારવિન્દમ્......) શ્રીગુરુપરમ્પરાદિકમનુસન્દધત્ અપ્રમેયકૃપારત્નાકરસ્ય ભગવતઃ શ્રીરામચન્દ્રસ્ય સુપ્રભાતં પઠન્ અર્ચનયોગ્યો મુમુક્ષુરુપાસકો દણ્ડવદ્ભગવન્તં પ્રણમ્ય ભગવન્મન્દિરં પ્રવિશ્ય અર્ચનપાત્રાદીનિ સમ્પ્રક્ષાલયેત્ ॥

## રાઘવેન્દ્રસુપ્રભાતં

સર્ગસ્થિતિપ્રલયકર્મધુરન્ધરાય,
બ્રહ્મેન્દ્રરુદ્ર પરિપૂજિતપાદુકાય ।

સદ્ધર્મરક્ષણવિધૌ સતતં રતાય,
હે રાઘવેન્દ્ર ! ભવતે નવસુપ્રભાતમ્ ॥ ૧॥

હે કોસલેશ ! સરયૂજલશીતલોઽસૌ,
રમ્યઃ સુગન્ધિભરિતઃ પવનઃ પ્રભાતે ।
સંવાહયત્યતિસુખેન વપુસ્ત્વદીયં,
હે રાઘવેન્દ્ર ! ભવતે નવસુપ્રભાતમ્ ॥ ૨॥

હૃષ્ટો વશિષ્ઠપરમર્ષિરયં શુભાશી-
રાશીનિમાન્વિતરિતું તવ પુણ્ય ગેહે ।
સમ્પ્રાપ્ત એવ બહુસન્તગણૈઃ પરીતઃ,
હે રાઘવેન્દ્ર ! ભવતે નવસુપ્રભાતમ્ ॥ ૩॥

ઇક્ષ્વાકુવંશકુલદીપક ! પુણ્યકીર્તે !
હે જાનકીપ્રણયપાશવિલાસમૂર્તે !
ઉન્મીલયામલદૃશૌ કરુણામયૌ તે,
હે રાઘવેન્દ્ર ! ભવતે નવસુપ્રભાતમ્ ॥ ૪॥

તાતસ્તુ તે દશરથો મુદિતઃ સદૈવ,
માત્રાભિરત્ર સહિતઃ સમુપાગતોઽસૌ ।
ત્વદ્રમ્યમાનનસુખં સમવાપ્તુકામઃ,
હે રાઘવેન્દ્ર ભવતે નવસુપ્રભાતમ્ ॥ ૫॥

અન્યેઽપિ યે તવ સુભક્તિરતા મનુષ્યાઃ,
લોકે સ્વજન્મફલમાપ્તુમિહ પ્રભાતે ।
ત્વન્નામધેયજપમઙ્ગલમાચરન્તિ,
હે રાઘવેન્દ્ર ! ભવતે નવસુપ્રભાતમ્ ॥ ૬॥

હે રામચન્દ્ર ! કરુણામય, દીનબન્ધો !
હે કોસલેશ ! ભવતાપવિનાશદક્ષ !
સીતાપતે ! રઘુપતે ! જનતાપતે હે !
હે રાઘવેન્દ્ર ! ભવતે નવસુપ્રભાતમ્ ॥ ૭॥

## ઉત્થાપન

ઘણ્ટાનાદપૂર્વકં ઉત્થાપનમન્ત્રોચ્ચારણપૂર્વકં શ્રીભગવન્તમુત્થાપયેત્

ઉત્થાપન મન્ત્રઃ
કૌશલ્યાસુપ્રજા રામ પૂર્વાસન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૧॥

ઉત્તિષ્ઠોત્તિષ્ઠ ભદ્રં તે ત્યજ નિદ્રાં જગત્પતે । ત્વદીયોત્થાનમાત્રેણ ઉત્થિતં ભુવનત્રયમ્ ॥ ૨॥

ઉત્તિષ્ઠોત્તિષ્ઠ શ્રીરામ ભદ્રં તે કરુણાનિધે । ઉત્તિષ્ઠ જાનકીકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૩॥

ત્વદીયભાવપૂતાઙ્ગાઃ સપર્યાકાઙ્ક્ષયા પ્રભો ।
પ્રાર્થયન્તે સમાગત્ય રામભદ્ર પ્રબુધ્યતામ્ ॥ ૪॥

શ્રીમદ્ભગવદ્ચરણચઞ્ચરીકમુમુક્ષુરુપસકાભિમતાનુરૂપગુણવિભવૈશ્વર્યશીલાદ્યનવધિકાતિશયાસઙ્ખ્યકલ્યાણગુણગણં
અપ્રમેયકૃપારત્નાકરં ભગવન્તં શ્રીરામચન્દ્રં શરણમહં પ્રપદ્યે ।
તદનુ આચ્છાદનાદિકં સઙ્ગૃહ્ય, નિર્માલ્યં એકતઃ સંસ્થાપ્ય પાદ્યં
(દૂર્વાવિષ્ણુપર્ણીપદ્મશ્યામકસહિતં જલં પાદ્યપાત્રે નિક્ષિપેત્) -
ૐએતાવાનસ્યમહિમાતોજ્યાયાઁશ્ચપૂરુષઃ ।
પાદોઽસ્યવિશ્વાભૂતાનિત્રિપાદસ્યામૃતંદિવિ ॥

ઇદં પાદ્યં મયા દત્તં દિવ્યં નરવરોત્તમ ।
પ્રસીદ જાનકીનાથ ! ગૃહાણ સમ્મુખો ભવ ॥

ઇતિ પાદ્યં સમર્પયામિ ।
રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ પાદ્યં સમર્પયામિ । ઇત્યુક્ત્વા ભગવતઃ પાદૌ પ્રક્ષાલ્ય અર્ઘ્યં સમર્પયેત્ ।

## અર્ઘ્યમન્ત્રઃ

(સર્ષપાક્ષતકુશયવતિલચન્દનપુષ્પજાયફલસહિતં જલમર્ઘ્યપાત્રે નિક્ષિપેત્) -
ૐત્રિપાદૂર્ધ્વઉદૈત્પુરુષઃપાદોસ્યેહાભવત્પુનઃ।
તતોવ્વિઙ્વ્યક્રામત્સાશનાનશનેઽભિ ॥

દિવ્યૌષધિરસોપેતં દિવ્ય સૌરભસંયુતમ્ ।
તુલસીપુષ્પદર્ભાઢ્યમર્ઘ્યં મે પ્રતિગૃહ્યતામ્ ॥

ઇત્યર્ઘ્યં સમર્પયામિ ।
ૐરાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ અર્ઘ્યં સમર્પયામિ ।

## આચમનં

(એલાલવઙ્ગકક્કોલજાતિસહિતં જલમાચમનપાત્રે નિક્ષિપેત્ ।)
તતોવ્વિરાડજાયતવ્વિરાજોઽધિપૂરુષઃ ।
સજાતોઽત્ત્યરિચ્ચ્યતપશ્ચાદ્ભૂમિમથોપુરઃ ॥

સુગન્ધિવાસિતં દિવ્યં નિર્મલં સરયૂદકમ્ ।
ગૃહાણાઽઽચમનં નાથ ! પ્રસીદ મમ રાઘવ ॥

ઇત્યાચમનીયં સમર્પયામિ ।
ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ આચમનીયં  જલં સમર્પયામિ ।

## દન્તધાવનં

મન્ત્રરાજેન તુલસીકાષ્ઠેન દન્તધાવનં જિહ્વાલેખનઞ્ચ કુર્યાત્ । મન્ત્રોચ્ચારણપૂર્વકં ગણ્ડૂષં સમર્પયામીતિ જલં ષટ્કૃત્વા પતિતપાવનાખ્યે પાત્રે નિક્ષિપ્ય પુનઃ મન્ત્રરાજેનૈવ મુખશોધનં સમર્પયામીતિ વિભાવ્ય તજ્જલં તસ્મિન્નેવ પાત્રે નિક્ષિપેત્ ।
તતઃ મધુપર્કં નિવેદયેત્- તત્ર વિધિઃ - રત્નખચિતસ્વર્ણપાત્રે દધિ-મધુ-ઘૃતમિશ્રિતમધુપર્કં ભગવતઃ પુરતઃ સંસ્થાપ્ય મધુપર્કમન્ત્રઃ પઠેત્ ।

## મધુપર્કઃ

મધુવ્વાતાઽઋતાયતેમધુક્ષરન્તિસિન્ધવઃ ।
માધ્વીર્ન્નઃસન્ત્વોષધીઃ ॥

નમો રામાય ભદ્રાય તત્વજ્ઞાનસ્વરૂપિણે ।
મધુપર્કં ગૃહાણેમં જાનકીપતયે નમઃ ॥

ઇતિ મધુપર્કં સમર્પયામિ ।
ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ મધુપર્કં સમર્પયામિ ।
પુનઃ ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ઇત્યુક્ત્વા આચમનીયં જલં સમર્પ્ય શુભ્રવસ્ત્રેણ મુખંસમ્પ્રોક્ષ્યેત તતઃ ભગવતઃ પુરતઃ ચતુષ્કોણમણ્ડલમધ્યે બાલોચિત નવનીતાદિ સ્નિગ્ધભોજ્યં અખણ્ડાનિ ઋતુફલાનિ ચ સંસ્થાપ્ય ધૂપમાઘ્રાપયેત્ ।

## ધૂપમન્ત્રઃ

ધૂરસિધૂર્વ્વધૂર્વ્વન્તન્ધૂર્વ્વતંયોસ્માન્ધૂર્વ્વતિતન્ધૂર્વ્વયંવ્વયન્ધૂર્વ્વામઃ ।
દેવાનામસિવ્વહ્નિતમ ँ સસ્નિતમમ્પપ્રિતમઞ્જુષ્ટતમન્દેવહૂતમમ્ ॥

વનસ્પતિરસોત્પન્નં સુગન્ધાઢ્યં મનોહરમ્ ।
ધૂપં ગૃહાણ દેવેશ ! જાનક્યા સહ રાઘવ ॥

ઇતિ ધૂપં સમર્પયામિ ।
ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ધૂપમાઘ્રાપયામિ ।
હસ્તૌપ્રક્ષાલ્ય દીપં સમર્પયામિ

## દીપમન્ત્રઃ

ચન્દ્રમામનસોજાતશ્ચક્ષોઃસૂર્યોऽજાયત ।
શ્રોત્રાદ્વાયુશ્ચપ્રાણશ્ચમુખાદગ્નિરજાયત ।
ઘૃતવર્તિ સમાયુક્તં કર્પૂરાદિ સમન્વિતમ્ ।
દીપં ગૃહાણ દેવેશ ! મમ સિદ્ધિપ્રદો ભવ ॥

ઇતિ દીપં દર્શયામિ ।
હસ્તૌ પ્રક્ષાલ્ય પાર્ષદાન્ સન્નહ્ય ઘણ્ટાનાદં નાદયન્ તુલસીદલમિશ્રિતેન તુલસ્યુદકેન ૐ રાં રામાય નમઃ ઇતિ મન્ત્રેણ સમ્પ્રોક્ષ્ય ધેનુમુદ્રયા અમૃતીકૃત્ય તુલસીપત્રાણિ સંસ્થાપ્ય પૂર્વાપોશનપૂર્વકં નૈવેદ્યં નિવેદયેત્ ।

## નૈવેદ્યમન્ત્રઃ

નાભ્યાऽऽસીદન્તરિક્ષ ँ શીર્ષ્ણોદ્યૌઃસમવર્તત ।
પદ્ભ્યામ્ભૂમિર્દ્દિશઃશ્રોત્રાત્તથાલોકાઁર ॥ આકલ્પયન્ ॥

પૂપમોદકસંયાવપયઃ પક્વાદિકં વરમ ।
નિર્મિતં બહુસંસ્કારૈર્નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥

ઇતિ નૈવેદ્યં નિવેદયામિ ।
યાઃફલિનીર્યાऽફલાऽપુષ્પાયાશ્ચપુષ્પિણીઃ ।
બૃહસ્પતિપ્રસૂતાસ્તાન્નોમુઞ્ચન્ત્વ ँ હસઃ ॥

ઇદં ફલં મયા દેવ સ્થાપિતં પુરતસ્તવ ।
તેન મે સફલાવાપ્તિર્ભવેજ્જન્મનિ જન્મનિ ॥

ઇતિ ફલં સમર્પયામિ ।

## મઙ્ગલનીરાજનં

પુનઃ ઘણ્ટાનાદં નાદયન્ આચમનીયં જલં સમર્પ્ય કરોદ્વર્ત્તનં કુર્યાત્ । તતઃ ચામરવ્યજનાદિભિરુપચરન્ શઙ્ખ-ઘણ્ટા-દુન્દુભિઘોષપૂર્વકં અલઙ્કૃતપઞ્ચવર્ત્તિકાભિઃ નીરાજનં કુર્યાત્ ।
ચતુશ્ચરણયોઃ, દ્વિર્નાભૌ, મુખે સકૃત્ કૃત્વા સપ્તભિઃ સર્વાઙ્ગે ૐકારાકૃત્યા પરિભ્રામયેત્ । તદનન્તરં પશ્ચિમાદિ દિશાં તત્તદ્દેવાન્ તીર્થાનિ ચ સંસ્મૃત્ય પરિક્રમાક્રમેણ નીરાજયેત્ । પુનશ્ચ દેહલીસ્થ દેવાન્ સંસ્મૃત્ય ઈષદવનમ્ય ભૂમિં ચ નીરાજયેત્ ।
પુનઃ વારત્રયં જલેન ધૌતવાસસા ચ નીરાજનં કુર્યાત્ । શઙ્ખોદકં વારત્રયં ભ્રામયિત્વા ગરુડઘણ્ટાયાં, નીરાજનપાત્રે ઈષન્નિક્ષિપ્ય સમુપસ્થિત ભક્તજનાન્ અભિષિઞ્ચેત્ ।
પુષ્પાઞ્જલિં વિધાય અર્ચકઃ ચામરસેવાં કુર્યાત્ ।

## જયઘોષઃ

શ્રીરામલલા સરકાર કી જય ।
શ્રીઆનન્દકન્દ ભગવાન્ કી જય ।
શ્રીકૌશલ્યાનન્દન ભગવાન્ કી જય ।
શ્રીદશરથનન્દન ભગવાન્ કી જય ।
શ્રીકૈકયીનન્દન ભગવાન્ કી જય ।
શ્રીસુમિત્રાનન્દન ભગવાન્ કી જય ।
શ્રી ચારોં ભૈયન કી જય ।
શ્રીહનુમાન્ જી મહારાજ કી જય ।
શ્રીરામજન્મભૂમિ કી જય ।
શ્રીકૃષ્ણજન્મ ભૂમિ કી જય ।
શ્રીકાશીવિશ્વનાથ કી જય ।
શ્રીઅયોધ્યા ધામ કી જય ।
શ્રીસરયૂ મહારાની કી જય ।
જગદ્ગુરુ સ્વામી શ્રીરામાનન્દાચાર્ય જી મહારાજ કી જય ।
ગોસ્વામી શ્રીતુલસીદાસ જી મહારાજ કી જય ।
સમસ્ત પૂર્વાચાર્યોં કી જય ।
સર્વસન્તવૈષ્ણવ ભગવાન્ કી જય ।
સત્ય સનાતન ધર્મ કી જય ।

ગૌ માતા કી જય ।
ભારત માતા કી જય પુનઃ
મઙ્ગલા આરતી કી જય જય શ્રીસીતારામ

## મઙ્ગલાનુશાસનં

મઙ્ગલાનુશાસનં કુર્યાત્ ।
ૐ નમો ભગવતે ઉત્તમશ્લોકાય નમ આર્યલક્ષણશીલવ્રતાય નમ ઉપશિક્ષિતાત્મન ઉપાસિતલોકાય નમઃ સાધુવાદનિકષણાય નમો બ્રહ્મણ્યદેવાય મહાપુરુષાય મહારાજાય નમઃ ॥

મઙ્ગલાનીરાજનાનન્તરં સમર્ચનીયદેવસ્ય દક્ષિણપાર્શ્વે સમુપવિશ્ય આગ્નેયાદારભ્ય પ્રદક્ષિણક્રમેણ, પ્રક્ષાલિત પાદ્યાર્ઘ્યાચમનસ્નાનપાત્રાણિ સંસ્થાપ્ય તેષાં મધ્યે શુદ્ધજલપાત્રં નિધાય તત્ર
(૧) દૂર્વાવિષ્ણુપર્ણીપદ્મશ્યામકસહિતં જલં પાદ્યપાત્રે (વિષ્ણુપર્ણી,કમલ,તથા શ્યામક સહિત જલ) નિક્ષિપેત્ ।
(૨) સર્ષપાક્ષતકુશાગ્રતિલયવગન્ધજાયફલપુષ્પસહિતં જલં અર્ઘ્યપાત્રે (સરસો, અક્ષત, કુશાગ્ર, તિલ, યવ, ગન્ધ,જાયફલ ફૂલ સહિત શુદ્ધ છના હુઆ જલ) નિક્ષિપેત્
(૩) એલાલવઙ્ગકક્કોલજાતિસહિતં જલમાચનપાત્રે (ઇલાયચી, લવઙ્ગ, કક્કોલ, તથા જાયફલ સહિત જલ) નિક્ષિપેત્ ।
(૪) કોષ્ટમાજિષ્ઠહરિદ્રામુસ્તાશૈલેયચમ્પકવચકર્પૂરલામજ્જકસહિતં જલં (કૂઠ, મજીઠ, હલ્દી, મોથા, છબીલા, ચમ્પા, વચ, કર્પૂર તથા લામઙ્જક રસ સહિત જલ) સ્નાનપાત્રે નિક્ષિપેત્ શ્રીમન્ત્રરાજેન પ્રત્યેકં તત્તત્પાત્રં સમ્મન્ત્ર્ય સુરભિમુદ્રાં ચ પ્રદર્શ્ય વામપાર્શ્વે પૂર્ણકુમ્ભં નિધાય અન્યાનિ પૂજાદ્રવ્યાણિ દક્ષિણપાર્શ્વે ચ નિધાય મનસા સ્વાચાર્યં પાદ્યાદિભિઃ સમ્પૂજ્યતદ્ધસ્તેનૈવારાધનં સ્વીકાર્યમિતિ ભગવતે વિજ્ઞાપ્ય પૂર્વસ્થાપિતસ્વવામપાર્શ્વસ્થપૂર્ણકુમ્ભે શ્રીરામમન્ત્રોચ્ચારણપૂર્વકં તુલસીદલં નિક્ષિપ્ય શ્રીમન્ત્રરાજેનૈવાભિમન્ત્ર્ય તજ્જલેનપાદ્યાદિપઞ્ચપાત્રાણિ ષડક્ષરમન્ત્રોચ્ચારણપૂર્વકં ક્રમેણ પ્રપૂર્ય ઉદ્ધરણ્યાર્ઘ્યાદિ પઞ્ચપાત્રેભ્યઃ કિઞ્ચિત્કિઞ્ચિત્તોયં સમુદ્ધૃત્ય પૂર્ણકુમ્ભે નિક્ષિપેત્ । તત ઉદ્ધરણ્યાર્ઘ્યસલિલમાદાય નાસાગ્રપર્યન્તં ૐ વિરજે આગચ્છાગચ્છેતિ સપ્તકૃત્વા ઉક્ત્વા તત્તોયેનાત્માનં પૂજોપકરણાનિ ગર્ભગૃહભૂમિં ચ પ્રોક્ષ્યાપશિષ્ટમન્યત્ર પ્રક્ષિપેત્ ।

## તતસ્તુલસીપુષ્પાણ્યાદાયઃ

ૐ અયોધ્યાનગરે રમ્યે રત્નમણ્ડપમધ્યગે ।
સ્મરેત્કલ્પતરોર્મૂલે રત્નસિંહાસનં શુભમ્ ॥

તન્મધ્યેઽષ્ટદલં પદ્મં નાનારત્નૈશ્ચ વેષ્ટિતમ્ ।
સ્મરેન્મધ્યે દાશરથિં સહસ્રાદિત્યતેજસમ્ ॥

પિતુરઙ્કગતં રામમિન્દ્રનીલમણિપ્રભમ્ ।

કોમલાઙ્ગં વિશાલાક્ષં વિદ્યુદ્વર્ણામ્બરાવૃતમ્ ॥

ભાનુકોટિપ્રતીકાશં કિરીટેન વિરાજિતમ્ ।
રત્નગ્રૈવેયકેયૂરરત્નકુણ્ડલમણ્ડિતમ્ ॥

રત્નકઙ્કણમઞ્જીરકટિસૂત્રૈરલઙ્કૃતમ્ ।
શ્રીવત્સકૌસ્તુભોરસ્કં મુક્તાહારોપશોભિતમ્ ॥

દિવ્યરત્નસમાયુક્તં મુદ્રિકાભિરલઙ્કૃતમ્ ।
રાઘવં દ્વિભુજં બાલં રામમીષત્સ્મિતાનનમ્ ॥

તુલસીકુન્દમન્દારપુષ્પમાલ્યૈરલઙ્કૃતમ્ ।
કર્પૂરાગુરુકસ્તૂરીદિવ્યગન્ધાનુલેપનમ્ ॥

યોગશાસ્ત્રેષ્વભિરતં યોગેશં યોગદાયકમ્ ।
સદા ભરતસૌમિત્રિશત્રુઘ્નૈરુપશોભિતમ્ ॥

વિદ્યાધરસુરાધીશસિદ્ધગન્ધર્વકિન્નરૈઃ ।
યોગીન્દ્રૈર્નારદાદ્યૈશ્ચ સ્તૂયમાનમહર્નિશમ્ ॥

વિશ્વામિત્રવસિષ્ઠાદિમુનિભિઃ પરિસેવિતમ્ ।
સનકાદિમુનિશ્રેષ્ઠૈર્યોગિવૃન્દૈશ્ચ સેવિતમ્ ॥

રામં રઘુવરં વીરં ધનુર્વેદવિશારદમ્ ।
મઙ્ગલાયતનં દેવં રામં રાજીવલોચનમ્ ॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞમાનન્દકરસુન્દરમ્ ।
કૌસલ્યાનન્દનં રામં ધનુર્બાણધરં હરિમ્ ॥

વિજ્ઞાનહેતું વિમલાયતાક્ષં પ્રજ્ઞાનરૂપં સ્વસુખૈકહેતુમ્ ।
શ્રીરામચન્દ્રં હરિમાદિદેવં પરાત્પરં રામમહં ભજામિ ॥

ઇતિ પદ્યૈરિત્થમનુસન્ધાય ભગવચ્છ્રીરામચન્દ્રચરણારવિન્દે સમર્પયેત્ ।
અથાધારાદીન્ સંસ્મૃત્ય પૂજયેત્
ૐ આધારશક્ત્યૈ નમઃ આધાર શક્ત્યૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ પ્રકૃત્યૈ નમઃ પ્રકૃત્યૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ અખિલજગદાધારાય કૂર્મરૂપિણે નારાયણાય નમઃ ઇતિ અખિલજગદાધારાય કૂર્મરૂપિણે નારાયણાય પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ ભગવતેઽનન્તાય નાગરાજાય નમઃ ભગવતેઽનન્તાય નાગરાજાય પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ ભૂમ્યૈ નમઃ ભૂમ્યૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીસાકેતાય દિવ્યનગરાય નમઃ સાકેતાય દિવ્યનગરાય પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ પુષ્પકાય દિવ્યવિમાનાય નમઃ પુષ્પકાય દિવ્યવિમાનાય

પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ અષ્ટચક્રાયૈ શ્રીઅયોધ્યાયૈ નમઃ અષ્ટચક્રાયૈ શ્રીઅયોધ્યાયૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐઆનન્દમયદિવ્યરત્નમણ્ડપાય નમઃ આનન્દમયદિવ્યરત્નમણ્ડપાય પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐઆસ્તરણભૂતાય અનન્તાય નમઃ આસ્તરણભૂતાય અનન્તાય પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

## તતઃ અધોલિખિતૈઃ મન્ત્રૈર્દેવાન્ કલ્પયિત્વા પાદ્યાર્ઘ્યાદીનિ સમર્પયેત્

આગ્નેય્યાં દિશિ ૐ ધર્માય પીઠપાદાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । નૈરૃત્યાં ૐ જ્ઞાનાય પીઠપાદાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । વાયવ્યાં ૐ વૈરાગ્યાય પીઠપાદાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઐશાન્યાં ૐ ઐશ્વર્યાય પીઠપાદાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । મધ્યે ૐ પીઠભૂતાય અનન્તાય નાગરાજાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પ્રાચ્યાં ૐ અધર્માય પીઠગાત્રાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । દક્ષિણસ્યાં ૐ અજ્ઞાનાય પીઠગાત્રાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પશ્ચિમાયાં ૐ અવૈરાગ્યાય પીઠગાત્રાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઉત્તરસ્યાં ૐ અનૈશ્વર્યાય પીઠગાત્રાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । એભિઃ પરિચ્છિન્નતત્ત્વસદસદાત્મકાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ ઋગ્વેદાય પીઠવાહકાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ યજુર્વેદાય પીઠવાહકાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સામવેદાય પીઠવાહકાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ અથર્વવેદાય પીઠવાહકાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇત્થં ગન્ધપુષ્પાદિભિસ્તાનભ્યર્ચ્ય પ્રણમેત્ ।

પુનશ્ચ પીઠવાહકોપરિ - ૐ પરિચ્છિન્નતનવે પીઠભૂતાય શુદ્ધાત્મકાયાઽનન્તાય નાગરાજાય નમઃ ઇતિ તસ્મૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । તત્રાનન્તોપરિ ૐ અષ્ટદલ પદ્માય નમઃ ઇતિ તસ્મૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । તદ્દલેષુ ૐ સૂર્યાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । કેશરેષુ ૐ સં સોમમણ્ડલાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । કર્ણિકાયાં ૐ રં વહ્નિમણ્ડલાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇતિ મણ્ડલત્રયં ધ્યાત્વા પદ્મસ્ય પૂર્વપાર્શ્વદલે અષ્ટશક્તીભ્યઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ વિમલાયૈ ચામરહસ્તાયૈ નમઃ ઇતિ તસ્યૈ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્યાગ્નિકોણે ૐ ઉત્કર્ષિણ્યૈ ચામરહસ્તાયૈ નમઃ ઇતિ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્ય દક્ષિણદલે ૐ જ્ઞાનરૂપાયૈ ચામરહસ્તાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્ય નૈરૃત્યદલે ૐ ક્રિયાયૈ ચામરહસ્તાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્ય પશ્ચિમદલે ૐ યોગાયૈ ચામરહસ્તાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્ય વાયવ્યદલે ૐ સત્યાયૈ ચામરહસ્તાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્યોત્તરદલે ૐ પ્રહ્વ્યૈ ચામરહસ્તાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્યેશાનદલે ૐ ઐશાન્યૈ ચામરહસ્તાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

પુનશ્ચ-ભગવતોઽગ્રે કર્ણિકાયાઃ પૂર્વભાગે ૐ અનુગ્રહાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પદ્મસ્ય કર્ણિકાયાં ૐ જગત્પ્રકૃતયે દિવ્યયોગપીઠવાહકાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ દિવ્યયોગપીઠ વાહકોપરિ ૐ દિવ્યયોગપીઠાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । યોગપીઠે ૐ દિવ્યયોગપર્યઙ્કાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પર્યઙ્કોપરિ ૐ સહસ્રફણશોભિતાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પુરો ૐ ભગવત્પાદપીઠાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । તદુપરિ ૐ ભગવત્પાદુકાભ્યાં નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

અથ યન્ત્રોપરિ ભગવન્તં સંસ્થાપ્ય આસનં કલ્પયેત્ ।

અથ તાદૃશાષ્ટદલપદ્મસ્થપર્યઙ્કસ્થિતાનન્તોપરિ ।
પ્રપન્નાભીષ્ટસન્દોહ શ્રીરામ! કરુણાનિધે! શિવશેષાદ્યવિજ્ઞેયાશેષમાહાત્મ્ય રાઘવ ! સભ્રાતૃભિસ્સમાગચ્છ પાર્ષદૈન સહ પ્રભો ! આજ્ઞાપયસ્વ દાસં મામર્ચાયૈ શરણાગતમ્ ॥

ઇતિ સાનુજમપ્રમેયકૃપારત્નાકરં ભગવન્તં સાઙ્ગં સાયુધં સપરિકરં સવાહનં સશક્તિકં શ્રીરામચન્દ્રમાવાહ્ય પુષ્પાઞ્જલિં ચ તસ્મૈ પ્રદાય પૂર્વસ્થાપિતાર્ઘ્યપાત્રાત્ ઉદ્ધરણ્યાર્ઘ્યજલમાદાય પાદ્યં સમર્પયેત્ ।

## અથ પાદ્યમન્ત્રઃ

એતાવાનસ્યમહિમાતોજ્જ્યાયાઁશ્ચપૂરુષઃ ।
પાદોઽસ્યવિશ્વાભૂતાનિત્રિપાદસ્યામૃતન્દિવિ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ પાદ્યં સમર્પયામિ । ઇત્યુક્ત્વા ભગવતઃ પાદૌ પ્રક્ષાલ્ય અર્ઘ્યં સમર્પયેત્ ।

## અથાર્ઘ્યમન્ત્રઃ

ત્રિપાદૂર્ધ્વઽઉદૈત્પુરુષઃપાદોસ્યેહાભવત્પુનઃ ।
તતોવ્વિષ્વઙ્વ્યક્રામત્સાશનાનશનેઽભિ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ અર્ઘ્યં સમર્પયામિ । ઇત્યુક્ત્વા ભગવતઃ દક્ષિણ હસ્તં સમ્પ્રોક્ષ્ય આચમનીયં જલં સમર્પયેત્ ।

## અથાચમનમન્ત્રઃ

તતોવ્વિરાડજાયતવ્વિરાજોઽધિપૂરુષઃ ।
સજાતોઽત્ત્યરિચ્ચ્યતપશ્ચાદ્ભૂમિમથોપુરઃ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ આચમનીયં જલં સમર્પયામિ । ઇત્યુક્ત્વા આચમનીયં સમર્પ્ય શુભ્રવસ્ત્રેણ ભગવતઃ શુભાઙ્ગાનિ સમ્મૃજ્ય મધુપર્કં સમર્પયેત્ । તત્ર વિધિઃ - રત્નખચિતસ્વર્ણપાત્રે દધિ-મધુ-ઘૃતમિશ્રિતમધુપર્કં ભગવતઃ પુરતઃ સંસ્થાપ્ય મધુપર્ક મન્ત્રઃ પઠેત્ ।

## મધુપર્કમન્ત્રઃ

ૐ યન્મધુનો મધવ્યં પરમં રૂપમન્નાદ્યમ્ ।
તેનાહં મધુનો મધવ્યેન પરમેણ રૂપેણાન્નાદ્યેન પરમો મધવ્યોઽન્નાદોઽસાનિ ।

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ મધુપર્કં સમર્પયામિ ।
પુનઃ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ઇત્યુક્ત્વા આચમનીયં જલં સમર્પ્ય શુભ્રવસ્ત્રેણ મુખં સમ્પ્રોક્ષયેત્ ।

## અથસ્નાનં

સ્નાનપાત્રાજ્જલમાદાય ભગવન્તં સ્નાપયન્ મન્ત્રમુચ્ચરેત્ ॥

## સ્નાનમન્ત્રઃ

તસ્માદ્યજ્ઞાત્સર્વહુતઃસમ્ભૃતમ્પૃષદાજ્યમ્ ।
પશૂઁસ્તાઁશ્ચક્રેવ્વાયવ્વ્યાનારણ્યાગ્ગ્રામ્યાશ્ચયે ॥

## અથ દુગ્ધસ્નાનમ્

ૐ પયઃપૃથિવ્વ્યામ્પયઽઓષધીષુપયોદિવ્વ્યન્તરિક્ષેપયોધાઃ ।
પયસ્વતીઃપ્પ્રદિશઃસન્તુમહ્યમ્ ॥

કામધેનુસમુદ્ભૂતં સર્વેષાં જીવનં પરમ્ ।
પાવનં યજ્ઞહેતુશ્ચ પયઃ સ્નાનાર્થમર્પિતમ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ પયસ્નાનં સમર્પયામિ । પયસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ

## અથ દધિસ્નાનમ્

ૐ દધિક્રાવ્વ્ણોઽકારિષઞ્જિષ્ણોરશ્વસ્યવ્વાજિનઃ ।
સુરભિનોમુખાકરત્પ્રણઽયૂꣳષિતારિષત્ ॥

પયસસ્તુ સમુદ્ભૂતં મધુરામ્લં શશિપ્રભમ્ ।
દધ્યાનીતં મયા દેવ! સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ દધિસ્નાનં સમર્પયામિ । દધિસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ ।

## અથ ઘૃતસ્નાનમ્

ૐ ઘૃતમ્મિમિક્ષેઘૃતમસ્યયોનિર્ઘૃતેશ્રિતોઘૃતમ્વસ્યધામ ।
અનુષ્વધમાવહમાદયસ્વસ્વાહાકૃતમ્વ્વૃષભવ્વક્ષિહવ્વ્યમ્ ॥

નવનીતસમુત્પન્નં સર્વસન્તોષકારકમ્ ।
ઘૃતં તુભ્યં પ્રદાસ્યામિ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ઘૃતસ્નાનં સમર્પયામિ । ઘૃતસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ ॥

## અથ મધુસ્નાનમ્

ૐ મધુવ્વાતાઽઋતાયતેમધુક્ષરન્તિસિન્ધવઃ ।
માધ્વીર્ન્નઃસન્ત્વોષધીઃ ।
મધુનક્તમુતોષસોમધુમત્પાર્થિવ ँ રજઃ ।
મધુદ્યૌરસ્તુનઃપિતા ।
મધુમાન્નોવ્વનસ્પતિર્મ્મધુમાઁ૨.અ ॥

અસ્તુસૂર્યઃ ॥

માધ્વીર્ગ્ગાવોભવન્તુનઃ ॥

પુષ્પરેણુસમુદ્ભૂતં સુસ્વાદુ મધુરં મધુ ।
તેજઃ પુષ્ટિકરં દિવ્યં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ મધુસ્નાનં સમર્પયામિ । મધુસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ

## અથ શર્કરાસ્નાનમ્

ૐ અપાઁ ँ રસમુદ્વયસ ँ સૂર્યે ँ સન્ત ँ સમાહિતમ્ ।
અપા ँ રસસ્યયોરસસ્તંવ્વો ગૃહ્ણામ્યુત્તમમુપયામગૃહીતોઽસીન્દ્રાયત્વાજુષ્ટઙ્ગૃહ્ણામ્યેષતેયોનિરિન્દ્રાયત્વાજુષ્ટતમમ્ ॥

ઇક્ષુરસસમુદ્ભૂતાં શર્કરાં પુષ્ટિદાં શુભામ્ ।
મલાપહારિકાં દિવ્યાં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ શર્કરાસ્નાનં સમર્પયામિ । શર્કરાસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ

## અથ પઞ્ચામૃતસ્નાનં

દુગ્ધદધિઘૃતમધુશર્કરાસમ્મિશ્રિતપઞ્ચામૃતેન ભગવન્તં સ્નાપયેત્ । પઞ્ચનદ્યઃસરસ્વતીમપિયન્તિસસ્રોતસઃ ॥

સરસ્વતીતુપઞ્ચધાસોદેશેઽભવત્સરિત્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ પઞ્ચામૃતસ્નાનં સમર્પયામિ । પઞ્ચામૃતસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ ।

## અથ શુદ્ધોદકસ્નાનમ્

ૐ શુદ્ધવાલઃસર્વ્વશુદ્ધવાલોમણિવાલસ્તઽશ્વિનાઃશ્યેતઃશ્યેતાક્ષોરુણસ્તેરુદ્રાયપશુપતયે કણર્ણાયામાઽવલિપ્તારૌદ્રાનભોરૂપાઃપાજ
॥

શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ ।

## અથ ગન્ધોદકસ્નાનમ્

ૐ અ<sup></sup>ँ શુનાતેઽ ँ શુઃપૃચ્યતામ્પરુષાપરુઃ ।
ગન્ધસ્તેસોમમવતુમદાયરસોઽચ્યુતઃ ॥

મલયાચલસમ્ભૂતચન્દનેન વિમિશ્રતમ્ ।
ઇદં ગન્ધોદકસ્નાનં કુઙ્કુમાક્તં પ્રગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ગન્ધોદકસ્નાનં સમર્પયામિ । ગન્ધોદકસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ

## અથોદ્વર્ત્તનં

ગન્ધર્વ્વસ્ત્વાવ્વિશ્વાવસુઃપરિદધાતુવ્વિશ્વસ્યારિટ્ય્ૈયજમાનસ્યપરિધિરસ્યગ્નિરિડઽઈડિતઃ ॥

ચન્દનં મલયોદ્ભૂતં કસ્તૂર્યાદિસમન્વિતમ્ ।
કરોદ્વર્તનકં દેવ ગૃહાણ પરમેશ્વર ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ઉદ્વર્તસ્નાનં સમર્પયામિ । ઉદ્વર્તસ્નાનાન્તે શુદ્ધોદકસ્નાનં સમર્પયામિ । શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ

## અથાભિષેકઃ

પુરુષસૂક્તમન્ત્રૈઃ શઙ્ખેનાવિચ્છિન્નધારયા ભગવતઃ અભિષેકં કુર્યાત્ ।

ૐ સહસ્રશીર્ષાપુરુષઃસહસ્રાક્ષઃસહસ્રપાત્ ।

સભૂમિ ઁ સર્વ્વતસ્પૃત્વાત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ।

પુરુષઽએવેદ ઁ સર્વ્વંયદ્ભૂતંયચ્ચભાવ્યમ્ ।

ઉતામૃતત્વસ્યેશાનોયદન્નેનાતિરોહતિ ।

એતાવાનસ્યમહિમાતોજ્યાયાઁશ્ચપૂરુષઃ ।

પાદોસ્યવ્વિશ્વાભૂતાનિત્રિપાદસ્યામૃતન્દિવિ ।

ત્રિપાદૂર્ધ્વઽઉદૈત્પુરુષઃપાદોસ્યેહાભવત્પુનઃ ।

તતોવ્વિષ્વઙ્વ્યક્રામત્સાશનાનશનેઽભિ ।

તતોવ્વિરાડજાયતવ્વિરાજોઽધિપૂરુષઃ ।

સજાતોઽત્ત્યરિચ્ચ્યતપશ્ચાદ્ભૂમિમથોપુરઃ ॥

તસ્માદ્યજ્ઞાત્સર્વ્વહુતઃસમ્ભૃતમ્પૃષદાજ્યમ્ ।

પશૂઁસ્તાઁશ્ચક્રેવ્વાયવ્યાનારણ્યાગ્ગ્રામ્યાશ્ચયે ॥

તસ્માદ્યજ્ઞાત્સર્વ્વહુતઃઽઋચઃસામાનિજજ્ઞિરે ।

છન્દા ઁ સિજજ્ઞિરેતસ્માદ્યજુસ્તસ્માદજાયત ।

તસ્માદશ્વાઽજાયન્તયેકેચોભયાદતઃ ।

ગાવોહજજ્ઞિરેતસ્માત્તસ્માજ્જાતાઽજાવયઃ ।

તંયજ્ઞમ્બર્હિષિપ્રૌક્ષન્પુરુષઞ્જાતમગ્રતઃ ।

તેનદેવાઽયજન્તસાધ્યાઽઋષયશ્ચયે ।

યત્પુરુષંવ્વ્યદધુઃકતિધાવ્યકલ્પયન્ ।

મુખઙ્કિમસ્યાસીત્કિમ્બાહૂકિમૂરૂપાદાઽઉચ્યેતે ।

બ્રાહ્મણોઽસ્યમુખમાસીત્બાહૂરાજન્યઃકૃતઃ ।

ઊરૂતદસ્યયદ્વૈશ્યઃપદ્ભ્યા ઁ શૂદ્રોઽજાયત ।

ચન્દ્રમામનસોજાતશ્ચક્ષોઃસૂર્યોઽજાયત ।

શ્રોત્રાદ્વાયુશ્ચપ્રાણશ્ચમુખાદગ્નિરજાયત ।

નાભ્યાઽસીદન્તરિક્ષઁ શીર્ષ્ણોદ્યૌઃસમવર્તત ।

પદ્ભ્યામ્ભૂમિર્દિશઃશ્રોત્રાત્તથાલોકાર ॥ આકલ્પયન્ ।

યત્પુરુષેણહવિષાદેવાયજ્ઞમતન્વત ।

વ્વસન્તોસ્યાસીદાજ્યઙ્ગ્ગ્રીષ્મઽઇધ્મઃશરદ્ધવિઃ ।

સપ્તાસ્યાસન્પરિધયસ્ત્રિઃસપ્તસમિધઃકૃતાઃ ।

દેવાયદ્યજ્ઞન્તન્વાનાઽબધ્નન્પુરુષમ્પશુમ્ ।

યજ્ઞેનયજ્ઞમયજન્તદેવાસ્તાનિધર્મ્માણિપ્પ્રથમાન્યાસન્ ।

તેહનાકંમહિમાનઃસચન્તયત્રપૂર્વ્વેસાધ્યાઃસન્તિદેવાઃ ।

## અથ શુદ્ધોદકસ્નાનમ્

ૐ શુદ્ધવાલઃસર્વ્વશુદ્ધવાલોમણિવાલસ્તઽશ્વિનાઃશ્યેતઃશ્યેતાક્ષોરુણસ્તેરુદ્રાયપશુપતયે કણર્ણાયામાઽવલિપ્તારૌદ્રાનભોરૂપાઃપાજ
॥

શુદ્ધોદકસ્નાનાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ ।

## તતઃ પાત્રાવશિષ્ટજલેન યન્ત્રસ્થિતભગવદ્ભૂષણાનિ પાદ્યાદિભિરભ્યર્ચેત્-

ૐ કિરીટાય મુકુટાધિપતયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ દક્ષિણકુણ્ડલાય મકરાત્મને નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ વામકુણ્ડલાય મકરાત્મને નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ વૈજયન્તીમાલાયૈ શ્રીતુલસ્યૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ વત્સાય શ્રીનિવાસાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ કૌસ્તુભાયરત્નાધિપતયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ કાઞ્ચીગુણોજ્જ્વલાય દિવ્યપીતામ્બરાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સર્વેભ્યો ભગવદ્દિવ્યવિભૂષણેભ્યો નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇતિ ભગવદ્ભૂષણાનિ પાદ્યાદિભિરભ્યર્ચેત્ ।

તતઃ પાદ્યાર્ઘ્યાદ્યેકૈકપાત્રસ્થ જલેન ક્રમશઃ ભગવતો દિવ્યાયુધાન્યભ્યર્ચેત્ । ૐ શાર્ઙ્ગાય સબાણાય ચાપાધિપતયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સુદર્શનાય હેતિરાજાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ પાઞ્ચજન્યાય શઙ્ખાધિપતયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ કૌમોદક્યૈ ગદાધિપતયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ નન્દકાય ખડ્ગાધિપતયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇતિ ભગવતો દિવ્યાયુધાનિ પાદ્યાદિભિરભ્યર્ચેત્ ।
તતસ્તથૈવ ભગવત્પરિકરાન્ પાદ્યાર્ઘ્યાદ્યેકૈકપાત્રસ્થ જલેન ક્રમશઃ અભ્યર્ચેત્ । ૐ લં લક્ષ્મણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ ભં ભરતાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શં શત્રુઘ્નાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ હં હનુમતે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સું સુગ્રીવાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ વિં વિભીષણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ જાં જામ્બવતે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

ૐ નં નલાય નમઃ પાદ્યાર્घ્યાદીનિ સમર્પયામિ । ૐ નીં નીલાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ ગં ગવાક્ષાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ કેં કેસરિણે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સું સુષેણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સર્વેભ્યો ભગવત્પરિકરેભ્યો નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇતિ ભગવત્પરિકરાન્પાદ્યાદિભિરભ્યર્ચેત્ ।

તતસ્તથૈવ ભગવતો દ્વારપાલાન્ પાદ્યાર્ઘ્યાદ્યૈકૈકપાત્રસ્થ જલેન ક્રમશઃ અભ્યર્ચેત્ । પૂર્વે ૐ ઋક્ષરાજાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ નીલાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । દક્ષિણે ૐ સુગ્રીવાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ નલાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । પશ્ચિમે ૐ શત્રુઘ્નાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ અઙ્ગદાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઉત્તરે ૐ ભરતાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ વિભીષણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ભગવતોऽગ્રે ૐ આઞ્જનેયાય મહાબલાય હં હનુમતે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ભગવતઃ પૃષ્ઠે ૐ લં લક્ષ્મણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સર્વેભ્યો ભગવદ્દ્વારપાલેભ્યો નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇતિ ભગવતો દ્વારપાલાન્પાદ્યાદિભિરભ્યર્ચેત્ ।

તતસ્તથૈવ ભગવદઙ્ગદેવાન્ પાદ્યાર્ઘ્યાદ્યૈકૈકપાત્રસ્થ જલેન ક્રમશઃ અભ્યર્ચેત્ । ૐ શ્રીવિઘ્નેશાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીવાણ્યૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીદુર્ગાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીક્ષેત્રપાલાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીસૂર્યાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીચન્દ્રાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીનારાયણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીનરસિંહાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીવાસુદેવાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીવરાહાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇત્યઙ્ગદેવાન્ સમ્પૂજ્ય

ૐ શ્રીસીતાયૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

ૐ શ્રીલક્ષ્મણાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

ૐ શ્રીહનુમતે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ ।

ૐ શ્રીભરતાય નમઃ Oમ્ । ૐ શ્રીશત્રુઘ્નાય નમઃ ।

ૐ શ્રીવિભીષણાય નમઃ Oમ્ । ૐ શ્રીસુગ્રીવાય નમઃ ૐ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ શ્રીઅઙ્ગદાય નમઃ Oમ્ ।

ૐ શ્રીજામ્બવતે નમઃ Oમ્ । ૐ શ્રીપ્રણવાય નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ઇત્યઙ્ગમન્ત્રાન્ પ્રપૂજયેત્ ।

તતસ્તથૈવ ભગવત્પાર્ષદાદીનિ પાદ્યાર્ઘ્યાદ્યૈકૈકપાત્રસ્થ જલેન ક્રમશઃ અભ્યર્ચેત્ । ૐ સર્વેભ્યો ભગવદ્ગણાધિપેભ્યો નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ સર્વેભ્યો ભગવત્પાર્ષદેભ્યો નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । સર્વેભ્યો ભગવત્પરિકરેભ્યો નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ નીત્યૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । ૐ મુક્ત્યૈ નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । સાઙ્ગાય સાયુધાય સપરિકરાય દિવ્યમઙ્ગલમૂર્તયે નમઃ પાદ્યાર્ઘ્યાદીનિ સમર્પયામિ । તતઃ શુભ્રવસ્ત્રેણ સર્વાણ્યઙ્ગાનિ સમ્મૃજ્ય સિંહાસને સંસ્થાપ્ય ભગવન્તં વસ્ત્રાણિ સમર્પયેત્ ।

## અથ વસ્ત્રમન્ત્રઃ

તસ્માદ્યજ્ઞાત્સર્વહુતઃઋચઃસામાનિજજ્ઞિરે ।
છન્દાꣳસિજજ્ઞિરેતસ્માદ્યજુસ્તસ્માદજાયત ।
સન્તપ્તકાઞ્ચનપ્રખ્યં પીતામ્બરમિદં હરે ।
સઙ્ગૃહાણ જગન્નાથ રામચન્દ્ર નમોઽસ્તુતે ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ વસ્ત્રં સમર્પયામિ । વસ્ત્રાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ ।

## અથ યજ્ઞોપવીતમ્

તસ્માદશ્વાઽજાયન્તયેકેચોભયાદતઃ ।
ગાવોહજજ્ઞિરેતસ્માત્તસ્માજ્જાતાઽજાવયઃ ।
યજ્ઞોપવીતં સૌવર્ણં મયા દત્તં રઘૂત્તમ ।
ગૃહાણ સુમુખો ભૂત્વા પ્રસીદ કરુણાનિધે ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ વસ્ત્રં સમર્પયામિ । યજ્ઞોપવીતાન્તે દ્વિરાચમનીયં જલં સમર્પયામિ ।

## અથાભૂષણપૂજનં

ગન્ધપુષ્પૈઃ કેયૂરકિરીટાદીનિ સમ્પૂજ્ય ભગવન્તમલઙ્કુર્યાત્ ।

## શ્લોકઃ

મણીન્દ્રગર્ભં મુકુટાધિનાથં શ્રીમત્કિરીટં મણિકુણ્ડલે ચ ।
શ્રીકૌસ્તુભાદીનિ ચ દિવ્યભૂષણાન્યેતાનિ નિત્યં પ્રણમામિ વિષ્ણોઃ ॥

## અથાભૂષણધારણં

હિરણ્યપાણિઃસવિતાવિચર્ષણિરુભેદ્યાવાપૃથિવીઽન્તરીયતે ।
અપામીવાંબાધતેવ્વેતિસૂર્યમભિકૃષ્ણેનરજસાદ્યામૃણોતિ ॥

કિરીટં કુણ્ડલં હારં કઙ્કણાઙ્ગદનૂપુરમ્ ।
નાનારત્નમયં દિવ્યં ભૂષણં પ્રતિગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ આભૂષણાનિ સમર્પયામિ ।

## અથ ચન્દનમ્

તંયજ્ઞમ્બર્હિષિપ્રૌક્ષન્પુરુષઞ્જાતમગ્રતઃ ।
તેનદેવાઽયજન્તસાધ્યાઽઋષયશ્ચયે ।
મલયાચલ સમ્ભૂતં શીતમાનન્દવર્દ્ધનમ્ ।
કાશ્મીરઘનસારાઢ્યં ચન્દનં પ્રતિગૃહ્યતામ્ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ચન્દનં સમર્પયામિ ।

## અથ તુલસીદલસમર્પણમ્

શ્રીશ્ચતેલક્ષ્મીશ્ચપત્ન્યાવહોરાત્રેપાર્શ્વેનક્ષત્રાણિરૂપમશ્વિનૌવ્યાત્તમ્ ।
ઇષ્ણન્નિષાણામુમ્મઽઇષાણસર્વ્વલોકમ્મઽઇષાણ ।
કોમલાનિ સુગન્ધીનિ મઞ્જરી સંયુતાનિ ચ ।
તુલસ્યાઃ સુદલાન્યેવ ગૃહાણ રઘુવલ્લભ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ તુલસીદલાનિ સમર્પયામિ ।

## અથ પુષ્પમાલ્યમ્

યત્પુરુષંવ્યદધુઃકતિધાવ્યકલ્પયન્ ।
મુખઙ્કિમસ્યાસીત્કિમ્બાહૂકિમૂરૂપાદાઽઉચ્યેતે ।
સૌરભાણિ સુમાલ્યાનિ સુપુષ્પરચિતાનિ ચ ।
નાનાવિધાનિ પુષ્પાણિ ગૃહ્યતાં કરુણાનિધે ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ પુષ્પં - પુષ્પમાલાઞ્ચ સમર્પયામિ ।

## અથાઙ્ગપૂજા

તુલસીદલૈઃ પ્રત્યઙ્ગં વિભાવ્ય ભગવન્તં પૂજયેત્ ।
ૐ શ્રીરામચન્દ્રાય નમઃ પાદૌ પૂજયામિ । ૐ સૃષ્ટ્યાદિકારણાય નમઃ ગુલ્ફૌ પૂજયામિ ।

ૐ રાવણાન્તકાય નમઃ ઊરૂ પૂજયામિ । ૐ વિશ્વરૂપાય નમઃ જઙ્ઘે પૂજયામિ । ૐ લક્ષ્મણાગ્રજાય નમઃ કટિં પૂજયામિ । ૐ વિશ્વામિત્રપ્રિયાય નમઃ નાભિં પૂજયામિ । ૐ સર્વશેષિણે નમઃ ઉદરં પૂજયામિ । ૐ પરમાત્મને નમઃ હૃદયં પૂજયામિ । ૐ સુકણ્ઠમિત્રાય નમઃ કણ્ઠં પૂજયામિ । ૐ ધનુર્બાણધારિણે નમઃ બાહૂ પૂજયામિ । ૐ દિવ્યદેહાય નમઃ મુખં પૂજયામિ । ૐ પદ્મનાભાય નમઃ જિહ્વાં પૂજયામિ । ૐ દાશરથયે નમઃ દન્તાન્ પૂજયામિ । ૐ મેઘશ્યામાય નમઃ કપોલૌ પૂજયામિ । ૐ શિવમાનસહંસાય નમઃ નાસિકાં પૂજયામિ । ૐ શ્રુતિગોચરાય નમઃ કર્ણૌ પૂજયામિ । ૐ પુણ્ડરીકાક્ષાય નમઃ નેત્રે પૂજયામિ । ૐ શ્રીસીતાપતયે નમઃ લલાટં પૂજયામિ । ૐ જ્ઞાનગમ્યાય નમઃ શિરઃ પૂજયામિ । ૐ સર્વાભીષ્ટપ્રદાય નમઃ પૃષ્ઠં પૂજયામિ । ૐ સર્વાત્મને નમઃ સર્વાઙ્ગં પૂજયામિ । નમઃ શ્રીજાનકીનાથ સૌન્દર્યાદિગુણામ્બુધે । પાદગુલ્ફાદિસ્વઙ્ગેષુ હ્યઙ્ગપૂજાં ગૃહાણ મે ॥ ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ અઙ્ગપૂજાં સમર્પયામિ ।

## અથ સુગન્ધિદ્રવ્યમ્

ૐ ત્ર્યમ્બકંયજામહેસુગન્ધિમ્પુષ્ટિવર્ધનમ્ ।
ઉર્વ્વારુકમિવબન્ધનાન્મૃત્યોર્મુક્ષીયમામૃતાત્ ॥

પ્રધાનપુષ્પ સારાઢ્યસ્તવ પૂજનકર્મણિ ।
પ્રગૃહ્યતાં દીનબન્ધો ! ગન્ધોઽયં મઙ્ગલપ્રદ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ સુગન્ધિદ્રવ્યં સમર્પયામિ ।
તતઃ ભગવતઃ પુરતઃ ચતુષ્કોણમણ્ડલમધ્યે નૈવેદ્યં સંસ્થાપ્ય ધૂપમાઘ્રાપયેત્ ।

## અથધૂપમન્ત્રઃ

બ્રાહ્મણોઽસ્યમુખમાસીત્બાહૂરાજન્યઃકૃતઃ ।
ઊરૂતદસ્યયદ્વૈશ્યઃપદ્ભ્યાꣳ શૂદ્રોઽજાયત ।
વનસ્પતિરસોત્પન્નં સુગન્ધાઢ્યં મનોહરમ્ ।
ધૂપં ગૃહાણ દેવેશ ! પ્રસન્નો ભવ રાઘવ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ધૂપમાઘ્રાપયામિ ।
હસ્તૌ પ્રક્ષાલ્ય દીપં સન્દર્શયેત્ ।

## અથ દીપમન્ત્રઃ

ચન્દ્રમામનસોજાતશ્ચક્ષોઃસૂર્યોઽજાયત ।
શ્રોત્રાદ્વાયુશ્ચપ્રાણશ્ચમુખાદગ્નિરજાયત ।

ઘૃતવર્તિસમાયુક્તં કર્પૂરાદિસમન્વિતમ્ ।
દીપં ગૃહાણ દેવેશ ! મમ સિદ્ધિપ્રદો ભવ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ દીપં દર્શયામિ ।
હસ્તૌ પ્રક્ષાલ્ય નૈવેદ્યં નિવેદયેત્ ।

## અથ નૈવેદ્યમ્

પાર્ષદાન્ સન્નહ્ય ભગવતઃ શ્રીરામચન્દ્રસ્ય પુરસ્સરં સંસ્થાપિત નૈવેદ્યં તુલસીદલ મિશ્રિતેન તુલસ્યુદકેન ૐ રાં રામાય નમઃ મન્ત્રેણ સમ્પ્રોક્ષ્ય ધેનુમુદ્રયાऽમૃતીકૃત્ય તુલસીપત્રાણિ સંસ્થાપ્ય ઘણ્ટાનાદં નિનદન્ પ્રેમ્ણા નિવેદયેત્

## અથ નૈવેદ્ય મન્ત્રઃ

નાભ્યાऽસીદન્તરિક્ષꣳ શીર્ષ્ણોર્દ્યૌઃસમવર્તત ।
પદ્ભ્યામ્ભૂમિર્દ્દિશઃશ્રોત્રાત્તથાલોકાર ॥ આકલ્પયન્ ।
પૂપમોદકસંયાવપયઃ પક્વાદિકં વરમ ।
નિર્મિતં બહુસંસ્કારૈર્નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥

પૂર્વાપોશનં અમૃતોપસ્તરણમસિ સ્વાહા । ગ્રાસમુદ્રાઃ પ્રદર્શયેત્ૐ પ્રાણાય સ્વાહા ૐ અપાનાય સ્વાહા ૐ વ્યાનાય સ્વાહા ૐ ઉદાનાય સ્વાહા । ૐ સમાનાય સ્વાહા ૐ બ્રહ્મણે નમઃ ।
ભગવતે શ્રીરામચન્દ્રાય નમઃ નૈવેદ્યં નિવેદયામિ ॥ ધાતૃફલાકૃતિ ગ્રાસઃ । અથ ઉત્તરાપોશનં (આચમનં ) ૐ અમૃતાપિધાનમસિ સ્વાહા ॥ તતોનૈવેદ્યં ભગવતે શ્રીરામચન્દ્રાય શાલગ્રામાય ચ નિવેદ્યાન્તઃ પટં દત્વા બહિરાગચ્છેત્ । વેદં પઠન્ અથ તારકબ્રહ્મજપન્ મધ્યે જલં નિવેદયેત્ ।
પુનઃ નાદં નિનદન્ આચમનીયં જલં સમર્પ્ય કરોદ્વર્તનં કુર્યાત્ । તતઃ છત્રાદિચામર વ્યજનાદીનિ સમર્પ્ય દુન્દુભિઘણ્ટાશઙ્ખાદિ નાદેન નીરાજનં કુર્યાત્ ।

## અથ છત્રમન્ત્રઃ

ક્ષત્રસ્યયોનિરસિત્રસ્યનાભિરસિ ॥
માત્ત્વાહિꣳ સીન્માමાહિꣳ સીઃ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ છત્રં સમર્પયામિ

## અથ ચામરમન્ત્રઃ

આનોનિયુદ્ભિઃશતિનીભિરદ્ધ્વરꣳ સહસ્રિણીભિરુપયાહિયજ્ઞમ્ ॥

વ્વાયોऽસ્મિન્ત્સવનેમાદયસ્વયુયમ્પાતસ્વસ્તિભિઃસદાઃ ।
ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ચામરસેવાં સમર્પયામિ

## અથ અશ્વમન્ત્રઃ

સુષારથિરશ્વાનિવયન્મનુષ્યાન્નેનીયતેભીશુભિર્વ્વાજિનऽઇવ ॥

હૃત્પ્રતિષ્ઠન્યદજિરઞ્જવિષ્ઠન્તન્મેમનઃશિવસઙ્કુલ્પમસ્તુ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ અશ્વં સમર્પયામિ

## અથ ગજમન્ત્રઃ

આતૂનऽઇન્દ્રવ્વૃત્રહન્નસ્માકમર્દ્ધમાગહિ ॥

મહાન્મહીભિરૂતિભિઃ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ ગજં સમર્પયામિ

## અથ રથમન્ત્રઃ

રથેતિષ્ઠન્નયતિવ્વાજિનઃપુરોયત્રયત્રકામયતેસુષારથિઃ ॥ અભીશૂનામ્મહિમાનમ્પનાયતમનઃપશ્ચાદનુયચ્છન્તિરશ્મયઃ ॥

ૐ રાં રામાય નમઃ અપ્રમેયકૃપારત્નાકરાય ભગવતે શ્રીરામચન્દ્રાય નમઃ રથં સમર્પયામિ

# અથ ગીતવાદ્ય નૃત્ય વિધિઃ

ભગવદુલ્લાસાય પરમ્પરાગાનં નૃત્યં  વાદ્યાનિ ચ સશ્રદ્ધં સમર્પયેત્ ॥

પુનઃ ઘણ્ટાનાદં નાદયન્ છત્ર-ચામરવ્યજનાદિભિરુપચરન્ શઙ્ખ-ઘણ્ટા-દુન્દુભિઘોષપૂર્વકં અલઙ્કૃતપઞ્ચવર્ત્તિકાભિઃ નીરાજનં કુર્યાત્ ।
ચતુશ્ચરણૌ, દ્વિર્નાભૌ, મુખં સકૃત્ કૃત્વા સમભિઃ સર્વાઙ્ગં ૐકારાકૃત્યા પરિભ્રામયેત્ । તદનન્તરં પશ્ચિમાદિદિશાં તત્તદ્દેવાન્ તીર્થાનિ ચ સંસ્મૃત્ય પરિક્રમાક્રમેણ નીરાજયેત્ । પુનશ્ચ દેહલીસ્થ દેવાન્ સંસ્મૃત્ય ઈષદવનમ્ય ભૂમિં ચ નીરાજયેત્ ।
પુનઃ વારત્રયં જલેન ધૌતવાસસા ચ નીરાજનં કુર્યાત્ । શઙ્ખોદકં વારત્રયં ભ્રામયિત્વા ગરુડઘણ્ટાયાં, નીરાજનપાત્રે ઈષન્નિક્ષિપ્ય સમુપસ્થિત ભક્તજનાન્ અભિષિઞ્ચેત્ ।

## પુષ્પાઞ્જલિં વિધાય અર્ચકઃ ચામરસેવાં કુર્યાત્ ।

## જયઘોષ

શ્રીરામલલા સરકાર કી જય ।
શ્રીઆનન્દકન્દ ભગવાન્ કી જય ।
શ્રીકૌશલ્યાનન્દન ભગવાન્ કી જય ।
શ્રીદશરથનન્દન ભગવાન્ કી જય ।
શ્રીકૈકેયીનન્દન ભગવાન્ કી જય ।
શ્રીસુમિત્રાનન્દન ભગવાન્ કી જય ।
શ્રી ચારોં ભૈયન કી જય ।
શ્રીહનુમાન્ જી મહારાજ કી જય ।
શ્રીરામજન્મભૂમિ કી જય ।
શ્રીકૃષ્ણજન્મ ભૂમિ કી જય ।
શ્રીકાશીવિશ્વનાથ કી જય ।
શ્રીઅયોધ્યા ધામ કી જય ।
શ્રીસરયૂ મહારાની કી જય ।
